## ।।अथ श्रीसत्यात्मतीर्थविरचितं श्रीसत्यवरतीथष्टकम् ।।

उपवासतपःप्राप्तरामवेदेश्वरार्चकम् ।
सद्र्मस्तुतमाहात्म्यं नौमि सत्यवरं मुनिम् । ॥९॥

ज्ञानभक्तिविरक्त्यादिगुणमण्डितपण्डितम् ।
सत्यसन्धप्रसादाल्यं नौमि सत्यवरं मुनिम् । ॥२॥

सत्यसन्धप्रियं शिष्यं सत्यधर्मप्रियं गुरुम् ।
पिनाकिनीतीरवासं नौमि सत्यवरं मुनिम् । ॥३॥

विष्णुतीर्थगुरं शान्तं विष्णुतीर्थोपदेशकम् ।
विष्णुतीर्थप्रदातारं नौमि सत्यवरं मुनिम् । ॥६॥

नृहर्यर्योपमत्वेन गीतं मोहनसंज्ञकैः ।
दासवर्यैशित्रचर्यं नौमि सत्यवरं मुनिम् ॥ ॥५॥

कल्पपादपदिक्पालसदृशत्वेन संस्तुतम् ।
जगन्नाथाख्यदासाय्नौंमि सत्यवरं मुनिम् । ॥६॥

जनमेजयहस्तेन स्थापितस्य हनूमतः।
सर्वदोपासकं भक्त्या नौमि सत्यवरं मुनिम् । ॥७॥

भक्त्या पूर्णादिसच्छिष्यैः सेवितं सुतपोनिधिम् ।
सेविनां शुभद प्राज्ञं नौमि सत्यवरं मुनिम् ॥ ॥८॥

सत्यात्मभिक्षुरचितं भक्त्या सत्यवराष्टकम् ।
यः पठेत् श्रृणुयाद्वापि स सर्वाभिीष्टभाग्भवेत् । ॥९॥

।। इति श्रीसत्यात्मतीर्थविरचितं श्रीसत्यवरतीथष्टिकम् ।।